श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमदण्णयार्यकृतिषु

# ॥ आचार्यविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Rajashree Venkatesh of Bahrain for providing us the text of this stotram and Smt. Goda Gopal of Bangalore for thoroughly proof-reading the document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सह रमया मुकुन्दमपि सूत्रवतीदयितं
शठरिपुनाथपङ्करुहलोचनदाशरथीन्।
हृदि कलयामि यामुनमुनीश्वर पूर्णयति-
प्रवरमुखान् समं मम गुरूनपि तद्गुरुभिः ॥ १ ॥

अधिगतसप्तथे महितभूम्नि गुरुप्रवरे
प्रथयति यत्र नव्यकरुणारसवर्षकताम्।
भजति सरस्वती बहुळतां निगमान्तगुरो-
स्स भवतु वादिहंसजलदो मम सत्फलदः ॥ २ ॥

अमृतरसप्रदाननिपुणो निजपादजुषां
विबुधगुणोपभोगघटनार्हकलाविभवः।
करिभयदस्थितिर्द्विजपतिर्निगमान्तगुरु-
र्नुदतु ममान्तरं सपदि सन्तमसं महसा॥ ३ ॥

निजमतिमन्धभूमिधरघातपरिक्षुभिता-
न्निगममहार्णवात् प्रपदनाभिधया सुधया।
समुदितया मुदं व्यधित यो विबुधव्रतते-
र्गुरुतिलकस्य तस्य रुचिरां रचयामि नुतिम्॥ ४ ॥

क्व भुवनसर्वलङ्घिमहिमा निगमान्तगुरुः
क्व पुनरहं मितंपचकथापथजाङ्घिकधीः।
अपि तु सरस्वती मम नुनूषति धूतभया
तदपि तदीयदिव्यकरुणापरिणाहबलात्॥ ५ ॥

मृदितसितोर्ध्वपुण्ड्रमुपवीतशिखारुचिरं
हृदयतटोपलक्ष्यतुलसी नलिनाक्षसरम्।
रथपदकम्बुबिम्बपरिचुम्बिभुजद्वितयं
धृतधवलांशुकं हृदि भजे निगमान्तगुरुम्॥ ६॥

विविधकथाविधूतपरिपन्थिघटामकुटी
तटविलुठन्मणीघृणिसमुज्ज्वलपादनखः।
गगनपरीपतत्सुरधुनीमहनीयझरी
प्रतिभटसूक्तिरस्तु शुभदो निगमान्तगुरुः॥ ७॥

अधिगतरङ्गपुङ्गवपदत्रचरित्रसुधा-
श्शठरिपुभारतीसहजसौरभसारभृतः।
यतिनृपतिप्रबन्धततिबन्धुरगन्धजुषः
कथकधुरन्धरोक्तिनिकरा मम भान्तु हृदि॥ ८॥

क्वचन मरन्दबिन्दुलहरीवहरीतिजुषः
क्वचन सुधाझरीसहचरीकरणप्रवणाः।
क्वचिदुपकल्पयन्त्यमरसिन्धुतरङ्गघटा
घुमुघुमितानुगाः परिणतीर्गुरुसिंहगिरः॥ ९॥

विबुधनिषेविता विविध तीर्थगणाध्युषिता
विमलसोल्बणा विहितविष्णुपदानुगतिः।
प्रकटितहंसमत्स्यकमठाद्यवतारशता
जगति सरस्वती जयति वेङ्कटनाथगुरोः॥ १०॥

जलधिसुतापदाङ्गदझलज्झलितानुगता
विधिवनिताशताङ्घ्रिहयहेषितगर्वमुषः।
मदनधनुर्गुणक्वणनमन्थरमानभिदो
जगति जयन्त्यमी गुरुपुरन्दरसूक्तिझराः॥ ११॥

अपि पुनरल्पजल्पमरविन्दभवस्य शिशो-
रपि कलभाषितानविगणय्य पतिर्जगताम्।

कलयति यद्वचांसि कलशाब्धिसुतासहित-
स्तमहमुपासिषीय नियतो निगमान्तगुरुम्॥ १२ ॥

समुदितसद्गुणां मृदुपदां शुभवृत्तजुषं
विलसदलङ्कृति कृतिमवेक्ष्य फणिप्रवरः।
निगमशिखागुरोर्निजशिरश्चलनच्छलतो
भ्रमयति मौळिरत्नमयमङ्गळदीपगणम्॥ १३ ॥

मधुसहयुध्वने नवफलद्रवमानमुषे
सहजनुषे सुधारसझरीलहरीविततेः।
निगमशिखागुरोर्नियमितान्यवचः स्थितये
कवनकलाविलासकलानाभ्युदयाय नमः॥ १४ ॥

दळति च शङ्करस्य गळति द्रुहिणस्य मतं
स्फुटति तथा तथागतकथा शतधा वितथा।
भवति भिदेलिमा सपदि काणभुजी फणिति-
र्जगति विजृम्भिते कथकसिंहमहानिनदे॥ १५ ॥

पटुतरतर्ककर्कशनखाङ्कुरनिर्दलित-
द्विषदिभमौळिमण्डलविनिर्गलितैर्मणिभिः।
दिशि दिशि यद्यशोभिरतनुभिरशोभि जगत्
कथमुपयाति नैष कवितार्किकसिंहपदम्॥ १६ ॥

जनिजनितोपतापहरणं शरणं भजता-
मतिमतिकर्मनर्मसदनं सदनन्तगुणम्।
मधुमधुरोक्तिमुल्लसदयं सदयं हृदय
श्रय तनयं विरक्तिकमनं तमनन्तगुरोः॥ १७ ॥

भवनभवनं वाचां प्राचां फणिद्रुहिणाङ्घ्रिदृ-
क्कपिलकणभुक्तन्त्रस्वातन्त्र्यकेळिकलास्पदम्।
कमलविभवास्थानं गन्धर्वकन्धरमन्दुरा
फणिगिरिपतेर्घण्टांशो नस्स पातु कृपाम्बुधिः॥ १८ ॥

नौमि श्रीमन्तमन्तर्मुखमुखरहयग्रीवहेषाविशेष-
प्रक्षुभ्यद्वैरिविद्वत् प्रणमित मकुटीराजिनीराजिताङ्घ्रिम्।
प्रातस्त्याम्भोजपाळीगळितमधुझरीमाधुरीधुर्यवाणी
श्रेणीभव्यप्रचारं फणिधरणिधराधीशघण्ठावतारम्॥ १९ ॥

निगमाचलोन्नतगतिर्निर्धूतहिरण्यनिजनखरवृत्तिः।
प्रह्लादसरसहृदयः पायात्कोऽप्यागमान्तगुरुसिंहः॥ २०॥

कवितार्किककण्ठीरवचरणाब्जं बिभृत मौळिभागेषु।
विलसतु वस्सार्वज्ञ्यं विबुधजनास्सर्वमङ्गलोल्लसितम्॥ २१ ॥

इति बुक्कपट्टणकुलाम्बुधीन्दुना तनयेन तातगुरुवेङ्कटाम्बयोः।
पदवाक्यमानपदवीपटीयसा कृतिरण्णयार्यविदुषा विनिर्मिता॥ २२ ॥

॥ इति आचार्यविंशतिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥